International Journal of Sanskrit Research 2022; 8(1): 318-320

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 318-320
© 2022 IJSR
www.anantaajournal.com
Received: 20-10-2021
Accepted: 24-11-2021

डॉ. धीरेन्द्र कुमार झा
ग्राम+पत्रालय- सुगौना, भाया- राजनगर,
जिला' मधुबनी, बिहार, भारत

Corresponding Author:
डॉ. धीरेन्द्र कुमार झा
ग्राम+पत्रालय- सुगौना, भाया- राजनगर,
जिला' मधुबनी, बिहार, भारत

# साहित्ये चेतनाशब्द–विमर्शः

डॉ. धीरेन्द्र कुमार झा

**सारांश**

आधुनिकयुगे चेतनाशब्दः आंग्लभाषायाः consciousne शब्दश्च समानार्थे प्रयुक्तौ भवतः। व्गवितक शब्दकोषानुसारं sate of being conscious अर्थात् स चेतना स्थितिः अथवा Totality of a person's thought and feeling अर्थात् कस्यापि विचाराणाम् अनुभूतीनां च समुदायः consciousness चेतना इति उच्यते। आप्टे वामन विचारानुसारं चित् धातोः ल्युट् प्रत्यये कृते चेतनाशब्दः सिद्ध्यति। तस्य स्त्रीलिङ्गे चेतना इति रूपं भवति। चेतनायाः अर्थः ज्ञानंए संज्ञाए प्रतिबोधः। दर्शनशास्त्रानुसारं विचारणाम्ए अनुभूतीनांए संकल्पनां च आनुशाङ्गिकी दशाए स्थितिःए भक्तिर्वा चेतना भवति। एवं विविधशब्दानुसारं प्राणिनः सामर्थ्यं विशिष्टा शक्तिर्वा चेतनापदेन consciousness वा उच्यते। इदमेव सामर्थ्यं विशिष्टा शक्तिर्वा तस्य बौद्धिकीनां भावनात्मिकानां वा क्रियाणां प्रवृत्तीनाम् उपलब्धीनां न मूलमस्ति।

**कूट शब्दः** भावनात्मिकानां, बौद्धिकीनां, चेतनाशब्दः

## प्रस्तावना

चित् चैतन्यम् चेतना, ज्ञानम् बोधः इत्याद्यनर्थान्तरम्। तदेव चैतन्यमद्वितीय सदानन्दरूपं प्रपञ्चरूपेण प्रतिभाति। तादृशस्य चैतन्यरूपास्यानुभवः शब्देनैव भवतीत्यतः सर्वो ऽपि प्रपञ्चः शब्दविषयः सिद्ध्यति। सः शब्दः मनुष्य एव किमपि तस्याज्ञात न भवति। परन्तु चेतना शब्दस्य अनन्य साधारणो विषयः यथा रूपादयः चक्षुरादिभिः बोध्यन्ते तथैव शब्देनापि, परन्तु या वेदना सदानन्दरूपैः निर्विषयब्रह्मस्वरूपिणी अद्वितीया अस्ति सातु कैवलयस्य शब्दस्यैव विषयः। तस्या स्वरूपं वर्णयन् व्यासः लिखति–

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।
ब्रह्मेति परमात्मेति भगवानिति शाब्द्यते॥ [1]

अर्थात् यज् ज्ञानम् अद्वयम् द्वैतरहितम् तदेव तत्त्वगिति तत्त्वविदः वदन्ति। द्वाभ्यां प्रकाराभ्यां इतम् ज्ञातम् द्वीतम्, तस्य भावः द्वैतम्। ज्ञानस्य द्वैतम् तस्य सविषयकत्वात् भवति। सविषयकत्वं च तस्य इन्द्रियैः क्रियते। निर्विषयज्ञानं न भवति इति तु नैव वक्तुं शक्यते, इन्द्रियव्यतिरेकेणापि तस्यानुभूयमानत्वात्। परन्तु अनुभूतिरपीदृशी सदानन्दरूपिणी ज्ञानस्य नाबाधिता भवति। अबाधितानुभूतिः तस्य शब्देन भवति। अतएव यद्वयं ज्ञानं शब्दयते, न तु दृश्यते, न श्रूयते, न रस्यते, न घ्रायते नापि स्पृह्यते। न्यायादनुसारमपि एकत्वादिव्यवहारहेतुः संख्या द्वित्वप्रभृति सर्वत्रैव बाध्यमानत्वात् अनित्यैवा। द्वित्वादिकं तु सर्वत्र अनित्यमेव इति तर्कसंग्रहः। एकत्वमेवाबाधितं सन्नित्यं भवति। तद्धि एकत्वं ज्ञानस्यैव, अत एव अद्वयं ज्ञानमिति प्रयुक्तवान् व्यासः। अव्यं ज्ञानं तत् शब्धते-शब्देन आविष्क्रियते। आविष्कारार्थकः शब्दधातुः धातुपाठे पठितः अस्ति। अन्येन केनापि प्रमाणेन अनाविष्कृतं तत्त्वं शब्दः आविष्करोति। सर्वप्रमाणिति शायित्वमिदं शब्दस्य मनीषिणाम् भारतीयानामवगतमासीदत एव प्रसिद्धः वैयाकरणः भर्तृहरिब्रह्मणः अक्षररूपत्वं शब्दस्य प्रतिपादयन लिखितवान् यज्जगतः सर्वापि प्रक्रिया अस्यैवानादिनिधनस्याक्षरस्य शब्दरूपस्य ब्रह्मणः अर्थभावेन विवर्तिता दृश्यते–

अनाधिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्तते ऽर्थभावेन प्रक्रिया जगतो यतः॥ [2]

भर्तृहरिरतः परमलेखीत् यल्लोक कुत्रापि ईदृक को ऽपि प्रत्यय एव नास्ति यः शब्दं विना भवेत्। प्रत्यक्षादिभिरपि जायमानं ज्ञानं शब्दसाहाय्यमपेक्षत एवं

न सोऽस्ति प्रत्ये लोके यः शब्दानुगमादृते।
अनुविद्धमिवज्ञानं सर्वं शब्देन भासते।। [3]

अनेन चित् तत्त्वस्य शब्दैकसमाधिगम्यत्वं सिद्ध्यति। अत एव दण्डी स्वीये काव्यादर्शे लिलेख यत् शब्द चेन्नाभविष्यत् भूर्भुवः स्वः रूपमिदम् भुवनत्रयम् घोरे अन्धे तमसि मग्नं अभविष्यत्-

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।। [4]

किमधिकम्- मनुष्यस्य मनुष्यत्वमपि शब्दाधीनमेव। सदानन्दरूपायाः अद्वितीयस्याः चितो ऽभिव्यञ्जनकेन शब्देनैव सः मनुष्यः। विना शब्दं तिर्यग्म्यः तस्य न भवति कोऽपि निवेशः। अत एव व्यासः लिलेख यत् भगवान् स्वशक्त्या मायया विविधानि शरीराणि अस्राक्षीत्। लघून लघुतरान् लघुतमां च कीटान् वृक्षान् सरीसृपान् पशून् पक्षिणः जलस्थलनभचरान् जरायुजान स्वेदजान् अण्डजान् उद्भिज्जां चासृजत् ! परं न तुतोश यतः एषु एकमपि शरीरम् शब्दप्रयोगार्हम् माभूत्, येन तदाध्यात्मिक सच्चिदानन्दरूपं बोद्धुं प्रभवेत्। ततः भगवता मानुषशरीरनिर्मितम्। ब्रावलोकधिशणं तच्छरीरं दृश्यद्वा भगवान् प्रासीदत् –

सृष्टवा पुराणि विविधान्ययजयात्म कित्या-
वृक्षान् सरीसृपप खगदं मत्स्यान्।
तैस्तैरतुष्टहृदयः पुरुषं विधाय
ब्रह्मवलोकधिशणं मुदमाप देवः।। [5]

अत्र ब्रह्मावलोकनं नाम सदानन्दरूपायाः आध्यात्मिक्याः चेतनायाः एकत्वस्य निर्विकोशानुभूतिः सा च शब्देनैव सम्भवति। ते च शब्दं प्रयोक्तुं मनुष्य एव शक्नोति, तत एव शरीरेषु तस्य श्रेष्ठ्यं भवति। शब्दस्य महत्त्वं राधास्वामीसम्प्रदायस्य सरसाहेबजीमहाराजैः( श्री आनन्दस्वरूपजी) इत्थं प्रमाणीकृतम्–
अस्यैव शब्दस्य उत्कृष्टतमं रूपं काव्यम्। उत्कृष्टतमत्वं चास्य सर्वाभिः शक्तिभिः विद्यमानत्वम् अभिधा लक्षणा, व्यञ्जना चेति तिस्रः शब्दस्य शक्तयः सन्ति। लौकिकान् खलु अर्थान् बोधयितुम अभिधालक्षणे प्रभवतः, परन्तु चित्तः सदानन्दरूपत्वमेकत्वं निर्विशेषत्वञ्च न लौकिकम्। अत एव तस्य तादृशं रूपमनुभावयितुं क्वचिल्लक्षणा विशेषतः व्यंजना आश्रीयते। इदमेव काव्यस्य काव्यत्वम्। तस्य कर्त्ता कविः। कवि शब्दः शब्दार्थकात् कुधातोः निश्पद्यते। कौति शब्दं करोतीति कविः। न हि कोऽपि पदार्थः जडः शब्दं कर्तुं शक्नोति। अत एव उपनिषत्सु यदेव तत्त्वं नित्यानां नित्यं चेतनानां चेतनमिति वर्णितम् तदेवतत्त्वं सर्वप्रथमं प्रकाशितम्-

ओंकारो चाथ शब्दश्च द्वावेतौ ब्राह्मणः पुरा।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ।। [6]
स भूरिति व्याहरत् भुवमसृजत।
वेदशब्देभ्यः एवादौ पृथक्संस्था च निर्ममे।। [7]

अत एवोपनिषत्सु तदेव कविरिति वर्णितम्–

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शद्धमपापविद्धम्।
कविर्मनीषी परिभूः स्वयम्भूर्यासातथ्यतोर्थान्
व्यदधात् सा वतीभ्यः समाभ्यः।। [8]
सर्वासामुपनिषदां सारभूतगीता अपि कविरिति तदेव तत्त्वं वर्णयति–
कवि पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः।
सर्वस्यधातारमचिन्त्यरूपमादित्यवर्ण तमतसः परस्तात्।। [9]

यद्यपि आदि कविरिति वाल्मीकिरेव प्रसिद्धिं गतः तथापि श्रीमद्भागवतस्य मङ्गलश्लोकः हिरण्यगर्भम् ब्रह्मणमेव आदिकविरिति वर्णयति तेन ब्रह्महृदा य आदिकाव्ये। ब्रह्म वेदः अस्यैवादिकवेः मा वतं काव्यम् यन्न न यति नापि जीर्यति जयदेवस्य काव्यम् न ममार न जीर्यति। देवोऽयं स एव कविः यः पूर्णब्राह्मणं विदधाति अनन्तरं तस्मै वेदान् प्रहिणोति। स एतात्मन् बृद्धे चापि प्रकारकाः। भूतं भव्यं भविष्यच्च सर्व वेदात् प्रसिद्धयतिरिति मनुरब्रवीत्। तस्यापि वेदस्य प्रकाशकः स कविः। अत एव कवि शब्दं क्रान्तदर्शि इति श्री शंकराचार्यः व्याख्यायौ। क्रान्तद्दर्शी सर्वज्ञः। क्रान्त्वा सर्वं जानाति। [10]
क्रान्तदभित्वादेव कवेः काव्यमपि तस्य क्रान्द एव भवति। जडत्वमतिक्रान्तेन तेन जडत्वमतिक्रान्तमेव त्रिकालाबाध्यं सदानन्दरूपं चैतन्य दर्श्यते। कवेरिदमेव कवित्व काव्यस्य च काव्यत्वम्। अत एव यथा न सर्वे प्राणिनः मनुष्यं लभन्ते न च सर्वे मनुष्याः विद्वांसः भवन्ति, तथैव न सर्वे विद्वांसः कवयः भवन्ति। यथा चेतनानां चेतनस्य पुराणस्य कवेरनुग्रहेण ब्रह्मणि कवित्वम् प्रादुर्बभूवः तस्य चानुग्रहेण वाल्मीकिः लौकिक्याः भाषायारादिकविर्जातः तथैव युगे युगे पुराणः कविरेव कविरूपेण वेदः एव तेषां काव्यरूपेण प्रादुर्भवति–

वेदवेद्ये परे पुंसि जाते व कारथात्मजे।
वेदः प्राचेतसादासीत् साक्षात् रामायणात्मना।। [11]

रस एव काव्यस्यात्मेति काव्यशास्त्रिभिः प्रतिपादितम् वाक्यं रसात्मकं काव्यम् साहित्यदर्पणः। अयमेव रसः क्वचित् ध्वनिरूपेण अन्यत्र रमणीयार्थत्वेन वर्णितः। परन्तु ऐतावता रसस्वरूपमुक्तं भवति। उपनिषत्सु अद्वितीया सदानन्दरूपा या चित् पुराणकविरिति वर्णिता तस्या एव रसत्वमपि तत्र-तत्र वर्णितम्- रसो वै सः।
एवं चेतना पदार्थस्य कवि पदार्थे सह सिद्ध्यति अभिव्यंग्य अभिव्यंजकभावः सम्बन्धः। सम्बन्धस्तु पदार्थयोः संजात्य एव भवति यथा तेजसम् रूपम् तेजसेन चक्षुषा एव गृह्यते, यथा वा पर्थिवः गन्धः पार्थिवेन घ्राणेनैव गृह्यते तद्वत् कवेः कर्मणा काव्येनैव चेतना आविष्क्रियते। कवेः यादृक्चेतना आविष्कृता भविष्यति तथैव तस्य रचनासु अपि चेतनासम्बद्धाः गुणाः आविष्कृताः भविष्यन्ति। एतेषु आनन्दरूपत्वं चेतनायाः परमो गुणः। अत एव मम्मटो ऽपि शिवेतरक्षतये सद्यः परनिर्वृत्तये इति लिखित्वा इदमेव काव्यस्य परमं प्रयोजनं स्वीकृतवान्। एतदर्थैव सर्वेषां प्राणिनां प्रवृत्तिः। अत एव युगे युगे ऽवतीर्णः यः कोऽपि कविः स्वकीयैः काव्यैः प्रयतते तद्युगजातानां चेतनां बोधयितुं तस्याः अद्वितीय सदानन्दरूपम्। काव्यस्य हेतुत्रयं वर्णनं मम्म्ट आह–

शक्तिर्निपुणता लोकशास्त्राद्यवेक्षणात्।
काव्यज्ञक्षियाभ्यास इति हेतुस्तदुद्भवे।। [12]

कवित्वे शक्तिः प्रथमो हेतुः। शक्तिरिय जन्मान्तरभवात् संस्काराल्लभ्यते। स्थावरजङ्गमात्मकस्य संसारस्य सूक्ष्मक्षिकयावेक्षणेन व्याकरणादि शास्त्राणां रामायणादि महाकाव्यानामध्ययने च लब्धा निपुणता द्वितीयो हेतुः। करयापि काव्यज्ञस्य शिक्षया कृतः अभ्यासः तृतीयो हेतुः।
आधुनिकयुगे सुरसरस्वतीसमाराधनैकव्रतः शास्त्री ईदृशः एव कः समर्थ कविः। त्रयोऽपि हेतवः समुदिताः श्रीसत्यव्रतशास्त्रिणी विद्यन्त इति तत् कृतीनामध्ययने स्पष्टमेव ज्ञातं भवति। वैदुष्यं तावत् तेन स्वपूज्यपितुः विश्रुतात् वैयाकरणात् अभिनवपाणिनेः पं. श्री चारुदेवशास्त्रिणः सकाशात् दायमिव लब्धम्। काले काले स्वकीय बन्धुभिः मित्रैश्च सह कृतः पद्यमयः तस्य पत्रविनिमयः तस्य कवित्व शक्तेः स्वाभाविकं व्यनक्ति। किमतः परमस्य शक्तेर्निदर्शनं भवेत् यदनेन लिखितैः पत्रैरपि काव्यरूपं गृहीतम्। लोकावेक्षणेन, शास्त्रावेक्षणेन काव्यादीनामवेक्षणेन सम्पादिता निपुणता तदुपदेशसु काव्येषु आलोचनात्मिकासु, कृतिशु, शताधिकेषु गवेषणापूर्णेषु निबन्धेषु प्रतिबिम्बिता भवति। सतयव्रतशास्त्री न केवलं वैयाकरणः अस्ति जन्मसिद्धः कविरपि अस्ति। दृढन्यायग्रंथग्रथिले संस्कृतव्याकरणे स तथैव प्रीयते यथा सुकुमारवस्तुनि साहित्ये। भारतीयेषु समालोचकेषु लेखकेशु अपि सः सम्मानितः। अनेन संस्कृतगिरा त्रयाणां महाकाव्यानां त्रयाणां खण्डकाव्यानां, एकस्य प्रबन्धकाव्यस्य पत्रकाव्यस्य च एकस्य पश्चानाम् आलोचनात्मकले खानाम् च रचना कृता। तस्य महत्त्वपूर्णासु कत्तिसु श्रीरामकीर्तिमहाकाव्यम् बृहत्तरम् भारतम्, बोधिसत्त्वचरितम्, वैदिकव्याकरणम्, सुतरां विभाति च गण्यन्तो। तेन रचितः

(Discovery of Sanskrit Treasures) सत्यसु खण्डेशु प्रकाशितः अस्ति। सम्प्रति सः दिल्लीनगरस्थे जवाहरलालनेहरूः विश्वविद्यालये संस्कृताध्ययनकेन्द्रे (Special centre for Sanskrit Studies) मानदः आचार्यत्वेन नियुक्तः अस्ति। सः दिल्लीविश्वविद्यालये अपि संस्कृतविभागाध्यक्ष कलासंकायप्रमुखः च आसीत्।

सः स्वकीये सेवाकार्यकाले बहुभिः राष्ट्रियैः अन्तर्राष्ट्रियैः सभाजितः। तेषु पुरस्कारेषु अन्यतमः अस्ति साहित्य अकादमी पुरस्कार, साहित्य-अकादम्या 1968 तमे वर्षे तस्य श्रीगुरुगोविन्दसिंहचरितम् काव्यस्य कृते विशिष्टः। तत्पश्चात् 2006 तमे वर्षे संस्कृतजगति ऐदम्प्राथम्येन ज्ञानपीठेन पुरस्कारेण सः सभाजितः। 1946 तमे वर्षे भारसर्वकारेण पद्मश्री इत्युपाधिना विभूषितः।

स्व. पुज्यपितुः पं. चारुदेवशास्त्रिणः सकाशात् प्राथमिकी शिक्षां गृहीत्वां वाराणस्यां पं. शुकदेव झा विदुषः, डॉ. सिद्धेश्वरवर्मा विदुषः सकाशाच्च अध्ययनं कृतवान्। पंजाबविश्वविद्यालयात् B.A., M.A. परीक्षयोः सर्वोत्कृष्टं स्थानं लब्धवान्। काशीहिन्दूविश्वविद्या- लयात् Ph.D. उपाधि अपि गृहीता।

दिल्लीविश्वविद्यालये नियुक्ते अननन्तरम् सः स्वकीये पञ्चाशदवर्षव्यापिनिकार्यकाले विभागाध्यक्षपदम् कलासंकायप्रमुखपदम् च अलङ्कृतवान्। उड़ीसाप्रदेशस्थ पुनः श्रीजगन्नाथसंस्कृतविश्वविद्या- लयस्य उपकुलपतिपदमपि अनेन महाकविना अलङ्कृतमभूत्। (Chulalogkorn University and Silpakorn University, Bankok] Northeast Buddhist Buddhist University, Nongkhai, Thailand. The University of Tubingen, Tubingen, Germany, T. Catholic University, Leuven Belgium, the University of Alberta, Edmonton, Canda) विश्वविद्यायेसु मानद आचार्यपदत्वम् अपि अनेन अलङ्कृतम्।

अनेन रचितं श्रीरामकीर्तिमहाकाव्यम् थाईलैण्डदेशीयस्य रामायणस्य संस्कृतं रूपान्तरमस्ति। तत्रास्य राज्ञः अनुरोधेन अस्य रामायणस्य निर्माणमभूत्। अस्य भूमिका तत्रत्या राजकुमार्या लिखिता अस्ति।

श्रीसत्यव्रतशास्त्रिणः मतमस्ति यत् कवित्वं स्वाभाविक, कैचित् कारणैः कवित्वं न निर्मियते, कविः स्वयमेव भवति अत एव सः स्वयम्भु इति उच्यते। अत एव प्रपञ्चस्रष्टा प्रजापतिना स उपमीयते। परन्तु प्रजापतेः तस्य अधिक वैशिष्ट्यमस्ति। यतः प्रजापतेः सृष्टिः नियतिकृतनियमरहिता भवति। परन्तु कविः स्वकीय काव्यसंसारस्य निर्माणे नियतिकृत नियमम् न अपेक्षते। प्रजापतेः सृष्टिः दुःखमयी कारणपरतन्त्रता, शृङ्गाररसरुचिरा भवति, कवेः सृष्टि ह्लादैकमयी, अनन्यपरतन्त्रा, नवरसरुचिरा भवति। श्रीसत्यव्रतशास्त्री न केवलं भाषाशास्त्री, प्राच्यविद्या-शास्त्री अपि विद्यते।

कस्यापि देशस्य समाजस्य राष्ट्रस्य वा या संस्कृतिः तस्या आचरणे अनुष्ठाने वा या जागरुकता सा एव सांस्कृतिकी चेतना इति उच्यते। यदाऽपि संस्कृति संकटापन्ना भवति तदैव इयं जागरुकता जनानाम् भवति। अत एव यदा यदा हि धर्मस्य ग्लानिर्भवति इति भगवदुक्तिः संगता भवति। कविः सांस्कृतिकस्य काव्यस्य निर्माणं तदैव करोति यदा सः पश्यति यत् तदीया संस्कृति ग्लानिर्ग्रस्ता अस्ति तदैव सः स्वसंस्कृतिप्रति जागरूक सचेतन च भवति। अत एव तेन निर्मिते साहित्ये सांस्कृतिकी चेतना अभिव्यज्यते।

**संदर्भ सूची**

1. श्रीमद्भागवत- 1/3/111
2. वाक्यपदीयम् ब्रह्मकाण्ड।
3. वाक्यपदीयम् ब्रह्मकाण्ड।
4. काव्यादर्शः।
5. श्रीमद्भागवत 11/9/25
6. श्रीमद्भागवतगीता।
7. मनुस्मृतिः।
8. ईशावास्योपनिषद् -81
9. गीतायाम्।
10. शाङ्करभाष्य ईशावास्योपनिषद् मन्त्र सं. 8।
11. वाल्मीकिरामायणम्।
12. काव्य प्रकाशः।